# २० विंश दशकः - देवकीपुत्र वधं

अथोरुपुण्ये मथुरापुरे तु विभूषिते मौक्तिक मालिकाभिः ।
श्रीदेवकी शौरि विवाह रङ्गे सर्वैः श्रुतं व्योम वचः स्फुटार्थम् ॥ २०-१॥

अवेहि भो देवक नन्दनायाः सुतोऽष्टमः कंस तवान्तकः स्यात् ।
श्रुत्वेति तां हन्तुमसिं दधानः कंसो निरुद्धो वसुदेव मुख्यैः ॥ २०-२॥

अथाह शौरिः शृणु कंस पुत्रान् ददामि तेऽस्याः शपथं करोमि ।
एतद्वचो मे व्यभिचर्यते चेत् मत्पूर्वजाता नरके पतन्तु ॥ २०-३॥

श्रद्धाय शौरे र्वचनं प्रशान्तः तां देवकीं भोजपति र्मुमोच ।
सर्वे च तुष्टा यदवो नगर्यां तौ दम्पती चोषतुरात्तमोदम् ॥ २०-४॥

काले सती पुत्र मसूत तातः कंसाय निश्शङ्क मदात्सुतं स्वम् ।
हन्ता न मेऽयं शिशुरि त्युदीर्य तं प्रत्यदा द्भोजपतिश्च तस्मै ॥ २०-५॥

अथाशु भूभार विनाश नाख्य त्वन्नाटक प्रेक्षण कौतुकेन ।
श्रीनारदः सर्वविदेत्य कंसं अदृश्य हासं सकलं जगाद ॥ २०-६॥

त्वं भूप दैत्यः खलु कालनेमिः जगत्प्रसिद्धो हरिणा हतश्च ।
ततोऽत्र जातोऽसि सुरा हरिश्च त्वां हन्तु मिच्छन्त्यधुनाऽपि शत्रुम् ॥ २०-७॥

देवास्तदर्थं नर रूपिणोऽत्र व्रजे च जाता वसुदेव मुख्याः ।
नन्दादयश्च त्रिदशा इमे न विस्रम्भणीया न च बान्धवास्ते ॥ २०-८॥

त्वं व्योमवाणीं स्मर देवकस्य पुत्र्याः सुतेष्वष्टमतां गतः सन् ।
स त्वां निहन्ता हरिरेव शत्रुः अल्पोऽपि नोपेक्ष्य इतीर्यते हि ॥ २०-९॥

सर्वात्मजानां नृप मेलनेऽस्याः सर्वेऽष्टमाः स्युः प्रथमे च सर्वे ।
मायाविनं विद्धि हरिं सदेति गते मुनौ क्रोधमियाय कंसः ॥ २०-१०॥

स देवकी सूनुमरं जघान कारागृहे तां पतिम प्यबध्नात् ।
तयोः सुतान् षट् खलु जातमात्रान् हत्वा कृतं स्वं हितमेव मेने ॥ २०-११॥

कायेन वाचा मनसेन्द्रियैर्वा मा जातु पापं करवाणि देवि ।
ममास्तु सत्कर्म रतिः प्रियस्ते भवानि भक्तं कुरु मां नमस्ते ॥ २०-१२॥